M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Rd. / Ser. 950

Title: Akhyata Vada

950

Complete

C	Akhyātāvāda		Title
		Bhatticarya	Author
			Editor
			Year, Vols.
Sk			Publisher
950			Remarks

श्रीगणेशाय नमः ॥ आख्यातस्य यत्नो वाच्यः । पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यातविवरणात् व्यवहारादिबाध
कं विना विवरणादपि व्युत्पत्तेः किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विनानुपपत्तेश्च । अचेतने रथो गच्छतीत्यादौ वा
नुकूलव्यापारे लक्षणैवेति प्राञ्चः । अन्यदीयगमनानुकूलनोदनादिमति गच्छतीत्यप्रयोगाज्जनकनियतत्वे हेतुर्विद्यते नितानी व्या
दौ क्रियानुकूलकृतिव्यापारयोरप्रतीतेर्गत्यादिमत्त्वमात्रप्रतीतेश्चाश्रयत्वे नश्यतीत्यादौ च प्रतियोगित्वे निरूढलक्षणा । चैत्रः पचति
तंडुलो मैत्रेण पच्यते तंडुल इत्यादावन्वयबोधस्य धात्वर्थप्रातिपदिकार्थयोर्भेदेन साक्षादन्वयस्याव्युत्पन्नतया संबंधमर्यादयान्
नस्यासंभवादिति तु नव्याः । कृत्याश्रयत्वाभिधायकत्वं क्रियाजन्यत्वप्रतिसंधानाविशेषेपि यत्नजन्यत्वाजन्यत्वप्रतिसंधानाभ्यां घटांकुर
रा.त योः कृताकृतव्यवहारात् आदिवदाश्रयपरत्वं जलकर्तृपदस्य कृत्याश्रयबोधकत्वाच्च । क्रियायाः क्रियानुकूलव्यापारस्य वाश्रयत्वे तदाश्रय
कारकमात्रं वा कर्तृपदस्यार्थः स्यात् । अपरथो वा छत्री निगमनं करोति निवीजादिनांकुरं करोतीति विनापि यत्नं कृञः प्रयोगात्तन्नस्य यत्न
वाचकत्वं कर्तृपदे च कृञो यत्ने निरूढलक्षणाय दिक्रियाश्रयमात्रेण न प्रयोगः । एवं चाचेतनेपि पचतीति प्रयोगात् [illegible] क्रियानुकू
लव्यापारप्रतीतिर्बाधकं विना गौणत्वायोगाज्जनकव्यापार एव तदर्थः तंडुलक्रियादेरन्नपाकादिजनकत्वमिति नातिप्रसंगः कृयना
ना पचतीत्यादौ पाकजनकयत्नानुभव इति चेन्न यत्नाविष्कृतपाकादिक्रियाविशेषेण कारणस्य यत्नस्यानुमानात् पचति पाकजनन
कयत्नवानिति तु तात्पर्यविवरणं अन्यथा धर्मिणोपि वाच्यतापत्तेः । अथैवं यत्नस्य वर्तमानत्वेन प्रतीयेत तस्यापदार्थत्वात्
अन्यत्र धात्वर्थे क्रियायां स्वार्थव्यापारे वा लडादेर्वर्तमानत्वाद्यनुभावकत्वस्य व्युत्पन्नत्वाच्च न च पाकजनकवर्तमानव्यापारे
णापाकजनकवर्तमानयत्नानुमानं यत्नविगमेपि पाकजनकव्यापारानुवृत्तेः धर्मिविशेषनिष्ठताच यत्नस्य न प्रतीयेत न तद्धर्मि
करणव्यापारस्यापि पाकजनकत्वात् चैतन्याविनाभूतचैत्रत्वादिविशेषवैतनेन यत्नानुमानमिति चेत् । चैत्रत्वाद्यप्रतीतावपि
विशेषानः पचतीत्यादौ शोभनादेः पाकजनकयत्नत्वप्रतीतेरिति सत्यं तथाख्यातस्य जनकयत्ने लाक्षणिकत्वात् मैवं जन रामः
कव्यापारमपेक्ष्य लाघवेन जनकयत्नस्यैव शक्यत्वात् । यत्नं विहाय जनकमात्रे शक्तिरस्तु लाघवात् तथा चाचेतनेपि प्रयो १

गेऽस्त्वेवेति चेन्न अपचत्यपि पाकजनकादृष्टवति पचतीति प्रयोगापत्तेः पाकजनकादृष्टजनकत्वेन पाकजनकत्वमानाभावात्
अतएव क्षित्यादेः कृत्यादिजन्यत्वे साध्ये तज्जनकादृष्टजनककृत्यादिनार्थान्तरप्रसंगोपि प्रत्युक्तः भावे चानादृशशक्तेर्निराकरण
यादृष्टाद्वारकत्वेन जनकतायास्त्वयापि वाच्यत्वात् । यत्नमात्रे शक्यविषयत्वे वासंबंधमर्यादया भासत इति तु नव्याः । कर्तृकर्मणोरा
ख्यातवाच्ये चैत्रः पचति पच्यते तण्डुल इति सामानाधिकरण्यानुरोधात् अन्यथा पचतीत्यत्रापि कर्तरि तृतीयापच्यत इत्यत्रा
पि कर्मणि द्वितीया स्यात् तयोरनभिहिताधिकारीयत्वात् कृत्यभिधानस्याविशिष्टत्वात् कर्तृकर्मगतसंख्याभिधानानभिधाना
भ्यां नियमः न च चैत्रेण दृष्टो घट इत्यत्र विनापि लिङ्गं तत्संख्याप्रतीतेः कृत्याशक्तेस्तु एव संख्योपस्थितिसंभवे निडो न तथाभिधा ६
यकत्वमिति वाच्यं चैत्रो मैत्रश्च गच्छत इत्यादौ विनापि तादृशस्युपं द्वित्वादिप्रत्ययात् लाघवादेकवचनत्वादिनैवैकत्वश
क्तत्वादित्यपि नास्ति कृतासंख्यानभिधानात् किंचैकत्वत्वादिना संख्याभिधाने न नियमः पदार्थतावच्छेदकावच्छिन्नस्याकां
क्षावशात् कर्तृकर्मसाधारणेनान्वयबोधस्य दुर्वारत्वात् कर्तृत्वत्वादिनाभिधाने कर्त्रादेरप्यभिधेयत्वं शक्तौ शक्यताव
च्छेदकयोश्च गौरवमधिकं । तस्मादाख्यातत्वेन कर्तरि आत्मनेपदत्वेन च कर्मणि एकवचनत्वादिना तत्तद्रूपेणानाएकत्वादौ शक्ति
एकपदोपात्तत्वाच्च संख्याया वाच्यगामित्वं कर्तृकर्मबोधकत्वं चैकदाव्युत्पन्नं । अतो मैत्रः पच्यते तंडुल इत्यादौ न प्रयोगः कर्त्रो
रेकस्यासाधुत्वाच्च पच्यते चैत्र इत्यादावपि कर्तरि न तिङ्व्याकरणं । आनयदानि भावना विशेष्ये संख्याया अन्वयः समानपदो
पात्तत्वेनैकान्वयित्वस्यौचित्यात् भावनायाश्च विशेष्यत्वेनान्वययोग्यः कर्मत्वाद्यैनवक अप्रथमान्तपदोपस्थाप्यः तथैव साकां
क्षत्वात् चैत्रः पचति पच्यते तंडुल इत्यादिकर्तृकर्मणी प्रथमान्तपदोपस्थाप्यतया भावनाविशेष्ये इति तत्रैव संख्यान्वयः चैत्रेण सु
प्यते गगनेन स्थीयत इत्यादौ प्रथमान्तपदाभावान्न तदर्थे [redacted] स्य भावनायां विशेषणतयैवान्वय
व्युत्पन्नत्वात् भावनाया बाधितत्वाच्च भावनाया [redacted] विशेष्यविरहादनन्वितैव संख्या एकवचनं तु सा

धुत्वार्थं अत एव व्यापारस्य द्वित्वे बहुत्वे पि औत्सर्गिकं चैकवचनमेव एवं च भावे तिङां यथायथं वर्तमानत्वेष्टसाधनत्वादिकमर्थः
न त्वधात्वर्थ एवान्वेति तथैव प्रत्ययात् तद्बोधकानां च घञादीनां प्रयोगसाधुतामात्रे भावनायाः कर्तृकर्माश्रयत्वेन कर्मणि पु
नरन्यथान्वयः न च कर्तृकर्माभिधायकत्व इवास्माकमपि तथान्वयबोधकत्वं अत एव मैत्रेण पचति तंडुलः मैत्रः पच्यते तंडुलमित्या
दयो न प्रयोगाः भावनापि व्यापाररूपविषयिका अन्यथा तेनानुरोधात् विभिन्नाभ्यां रूपाभ्यामेकधर्मिबोधकत्वरूपं सामानाधिकरण्य
मसिद्धं संनद्धत्याह शंतु न वार्यते अथ पचतीति चेत् इत्याश्रयतया चैत्रो रूपभावना विशेष्यः तंडुलः पच्यते मैत्रेणेत्यत्र तंडुलः
कथं विषयतयेति चेत् रथेन गम्यते ग्राम इत्यादौ स विषयव्यापाराभिधाने का गतिः अत्र प्राञ्चः मैत्रेण तंडुलः पच्यत इत्या
दौ मैत्रनिष्ठपाकभावनाविषयस्तंडुलो मैत्रनिष्ठभावनाविषयपाकजन्यफलशाली वा तंडुलः प्रतीयत इति स्वाश्रयत्वं परस्या भावनावि
शेष्यस्तंडुलः रथेन गम्यते ग्राम इत्यत्र रथनिष्ठगमनानुकूलव्यापारजन्यफलशालिग्रामः प्रतीयत इति व्यापारविषयो ग्राम इति न
व्यास्तु भावनादेराख्यातलभ्यत्वादाधेयत्वं तृतीयार्थो स्तु संख्यामात्रं वा संबंधस्तु पचतीत्यादौ विषयाख्यार्थः अस्तु वा फलकर्म
णोरपि संबंधस्तथा कर्तृतु कस्यार्थः न च तद्रूपितयाप्रकारीभूय भासमानत्वात् फलावच्छिन्नक्रियाया धात्वर्थत्वे पि क्रिया
यान्वयफलाभावात् विशेषणविशेष्यभावविपर्ययस्याशक्यत्वात् तस्मात्फलमात्मनेपदार्थः इत्थं चाख्यातोपस्थापिताया भा
वनायाः क्रियाविषयतायाः फलेन्वये फलस्य क्रियाजन्यत्वेन लभ्येत भावनापि विषयस्य च क्रियायाः फलेन्वये तिङुपस्थापितभाव
नायां क्रियाया विशेषणत्वे नान्यस्य स्वोन्वयो भज्येत तस्मात्कृत्यनभिधायकभावकर्मकयोगे स्वसहिते सुपोन्वयाभावनयावि
शिष्टायाः क्रियायाः फलेन्वयः सुबर्थे कृते क्रियायां विशेषणत्वेनैवान्वयस्य व्युत्पन्नत्वात् कर्तृकर्मवच्छकृतिफलयोरप्यभि
धाननियमो नातिप्रसंगः न चापच्यते तंडुलो मैत्र इत्यादयः प्रयोगाः तिङुपस्थाप्यायाः संख्याया भावनायाश्च प्रथमान्तपदोपस्था
प्येनैवान्वयो व्युत्पन्नः … गतो गतो ग्रामो मे नापन्नो गतं पुरं भोक्तव्य इति पक्वानि तंडुलं पचापसारितानित्यादौ सामानाधिकरण्या राम:
२

द्यन्यथानुपपत्त्या कर्तृकर्मणी लक्षणेत्युच्येते चैत्रस्य नाशो मैत्रादप्येष घटात्स्थकपरोक्षेत्यादौ विनपदार्थतावच्छेदकेनैव कृत्यादिना धात्वर्था
न्वयः तथैव साकांक्षत्वात् अस्तु वा कृत्यादिघटितः एव कर्मादिना समम न्वयः मुख्यभाक्तसाधारणस्य कृत्यादिलक्षणस्य कर्मत्वस्य
कृत्यादिलक्षणकर्तृत्वस्य चानभिधाने द्वितीयादयः अत्र च कृत्याविशिष्टाभिधाने विशेषणस्याप्यभिधानात् यत्तु धातूत्तरप्रत्य
यत्वेन कृतौ शक्तिः पाचकादिपदे तु सामानाधिकरण्यानुरोधात्कृतिविशिष्टे लक्षणेति तन्न भावकृतोपि कृतिवाचकतापत्तेः धातु
त्यादिघटितात्समादाख्यातत्वस्यैव लघुत्वाच्च यदपि कर्तृकृतो पि कृतौ शक्तिः कृतिविशिष्टे तु लक्षणेति तदप्यसत् यतो विनाव
च्छेदकं लक्षणा अशक्यत्वात् संनवास्ति गोत्वत्वादिना शक्तो चानीव गोरवादलक्षणाघाटादिपदानां गोत्वादिविशिष्टे शक्यं विशिष्टान्तरेणानुशक्य
एव त्वं किं नीयेत केवलविशेषणे स्वारसिकप्रयोगविरहस्तुल्यो एवं च गतो गम्यत इत्यो फलस्य कृदाख्याताभ्यामेव लाभाद्घञाद्यो
रनन्यलभ्य व्यापारविशेषमात्रं वाच्यमिति स्थितो ग्रामं गच्छति त्यागमस्य गंतेत्यादौ फलजनकत्वलक्षणं कर्मत्वं सर्वो द्वितीयादि
फले चत्र प्रतिपादितार्थो विशेषणतयान्वेति फलमात्रं वार्थो जनकत्वं संसर्गमर्यादया लभ्यत इति चेन्न तदप्यसत् ग्रामं गच्छति
त्यत्र नीत्यादौ द्वितीयादिनः फलसामान्यलाभेपि नियतसंयोगविभागाद्यलाभात् तस्मात्फलविशेषावच्छिन्नव्यापारस्यैव धा
त्वर्थत्वात् अन्यथा त्यजि गमि प्रभृतीनां पर्यायतापत्तेः तथापि गम्यते ग्राम इत्यादौ ग्रामादेः संयोगादिशालित्वं कुतः प्रतीयत इ
ति चेत् तदवच्छिन्नव्यापारवाचिधातुसमभिव्याहारादेव यथेष्टसाधनताबोधकाद्विधेरेव स्वर्गकामादिसमभिव्याहारात्स्वर्ग
दिगामित्वं प्रतीतिस्तु दृष्ट साधनफलयो रिष्टत्वफलाभ्यां स्वगत्वसंयोगाभ्यां चेत्यन्यदेतत् अस्तु वा बुद्धिविशेषविषयबोधक च
तदादेरिव व्युत्पत्तिवशादेव प्रत्ययार्थावच्छेदकफलनिष्ठान्विताभिधायकाख्यातकृतोरपि विशेषरूपेण बोधकत्वं अपि च धात्वर्थता
वच्छेदकफलशालित्वं कर्मत्वं न तु धात्वर्थजन्यफलशालित्वमात्रं गम्यपत्योः कर्मत्वस्य पूर्वस्मिन्देशे त्यजेरुत्तरस्मिन्देशे स्पंद
स्य पूर्वापरदेशयोः प्रसंगात् फलावच्छिन्नव्यापारबोधकत्वादेव धातूनां सकर्मकत्वव्यवहारो भाक्तस्तु जानातीत्यादेस्तादृशधातु
योग एव च कर्मप्रत्ययः तत्र च द्वितीयया धेयत्वमभिधीयते तच्चाकांक्षादिवैचित्र्याद्वा तथैतावच्छेदकफलेन्वेति अत एव चा
स्याः पदार्थान्विताधेयताबोधकसप्तमीतो भेदः … त्याकर्मव्याख्यानं सेयं द्वितीयायामपि फलमर्थः … वा फलव्यापारोभय
अ

गवधातोरर्थो। विशिष्टस्त्वन्वयबललभ्यः भूमिं प्रमाति विहगो विजहाति महीरुहं न तु स्वात्मानमित्यादिप्रयोगस्यानुरोधतः क्रिया
न्वयिपरसमवेतत्वमपि कर्मप्रत्ययार्थः इयांस्तु विशेषो यत्परत्वं सुपाद्युक्तत्वयोः पिक्षिप्तं तिङा तु नाच स्वार्थफलाश्रयापेक्षितं
त्वा बोध्यते घटं जानाती च्छति कुरुते चैत्रो मैत्रेण ज्ञायते इष्यते क्रियते घट इत्यादौ सविषयपदार्थाभिधायिधातुप्रयोगे कर्मप्रत्यये
न यथायथं विषयित्वं विषयत्वं च कर्तृत्वे तिङाश्रयत्वं तृतीयया चाधेयत्वं बोध्यते अन्वयबोधे तत्र विशेषः यदेकत्वे यो आश्रयत्वं कर्त्रे
त्य तत्र क्रियातः विषयिता तत्र च कर्म च विशेषणं प्रत्युत कर्मणि विषयता तत्र क्रियानाधेयत्वं तत्र कर्तेति। ताता तातेन इत्यादौ
दौ च कर्मकर्तृत्वे क्रतां विषयाश्रयप्रतियोगि बोधकत्वं भोजनाय यतते इत्यादौ चयत्यादिनोपास्थिते यत्नादौ विषयत्वेन नान्वयोपि
तु उद्देश्यत्वेन पदस्याभाव्यात् अत एवानुज्ञाने पि भोजनाय यतत इति प्रयोगः फलं धातोरर्थः अनुकूलव्यापारो व्यापारमात्रं वा
ख्यातस्य जन्यजनकभावः संसर्गमर्यादयालभ्यः लडादितिङाद्यर्थो वर्तमानत्वादीष्टसाधनत्वादि कर्मकृपदोपात्तत्वप्रत्या
सत्या तत्रैवान्वेति भानप्रत्ययस्य घञादेरनुकूलव्यापारमात्रमेवार्थः तेन व्यापारसत्वे फलानुत्पाददशायां पाको न विद्यत इति न
प्रयोगः न व्यापारविगमे फलसत्वे पाको विद्यत इति प्रयोगः नापि घटपटयोर्मिथः संयोग इति वह्निसंयोगमनमित्यादिप्रयोगः
प्रत्ययोपनीतपरसमवेतव्यापारजन्यधात्वर्थफलशालित्वं कर्मत्वं फलनिष्ठाधेयत्वं च तृतीयादिनाभिधीयते एवं च तडु
कृया लं पचति चैत्र इत्यस्य तडुलवृत्ति फलविशेषजनकव्यापारवांश्चैत्र इत्यर्थः मैत्रेण पच्यते तडुल इत्यस्य मैत्रनिष्ठव्यापारजन्यफ
लविशेषशाली तडुल इत्यर्थः फलव्यापारयोर्विशेषणविशेष्यभावभेदादेव कर्तृकर्मप्रत्ययव्यवहारः वस्तुतस्तु आख्यात
स्यैव तृतीयायाश्च व्यापार एवार्थः कर्माख्यातस्य च धात्वर्थफलनिरूपितत्वमधिकरणत्वं कर्मत्वं तः फलाश्रयः कर्तृत्वं न
व्यापाराश्रयः कर्तृकर्मसामानाधिकरण्यानुरोधात् आनात्यादेः प्रयोगे नुपूर्वी द्वैधरी निरनुसरणीया चैत्रेण पच्यते पच
मित्यादौ च सुवर्थ एव वर्तमानत्वाद्यन्वयः पचमान इत्यादौ व्यापारेन्वयः [illegible] स्ताव व्यापाराश्रयोः शक्यो विशिष्टमन्व
यवलल्भ्यं एवकारस्यैवान्ययोगव्यवच्छेदो अन्ययोगप्रतियोगिकव्यवच्छेदस्यातिप्रसक्तत्वात् अन्ययोग [illegible] त्वावच्छिन्न
प्रतियोगिताकव्यवच्छेदस्य शक्यत्वे शक्याप्रसिद्धिर्बोधितत्वं च पार्थ एवेत्यादौ पार्थान्ययोगत्वावच्छिन्नव्यवच्छेदस्याप्रत्ययप्रसंगात् राम: ३

ति
तस्य तनोन्यत्वात् स्वान्ययोगव्यवच्छेदत्वेन शक्यत्वे च सत्वस्याननुगमाद् व्यानंत्यं तस्मान्नीलो घटो नास्ति नील घटत्वावच्छिन्नस्य
व [redacted] पार्थान्ययोगत्वावच्छिन्नस्येवाभावप्रतीतेः समाने चैवं क्तो कालान्वयवादिनां धात्वर्थानुकूलव्यापा
रविरहिएव्यपि महीरुहादौ संयुज्यते संयुक्त इत्यादौ व्यवहारात् संयोगवत्वमात्रप्रतीतेश्च न च तत्र प्रत्ययस्य व्यापारवाचित्वे तिनस
कर्मत्वं संयोग इत्यादौ धात्वर्थमात्रप्रतीते घटनादेः प्रयोगसाधुत्वमात्र मिति मिडन्तमतानुयायिनः तन्न पचतीत्यादौ पाकानुकूलव
त र्तमानयत्नानुभवप्रसंगात् न तत्र तत्तत्कालानुकूल तत्तद्व्यापारविशेष एव धात्वर्थः सर्वत्र धात्वर्थे [illegible] य ---- कर्तृत्वं संख्या वर्त
मानत्वादिकं क्वचिदाश्रयत्वादि कर्मपि आख्यातार्थ इति गुम्फनमपि तत्र ताद्दशयत्नानुभवप्रसंगे नानुपादेयमेवेति दिक्॥ ।
इति तार्किकशिरोमणि भट्टाचार्यरचित आख्यातवादः॥ ॥ शुभमस्तु श्रीरामलक्ष्मणाभ्यां नमः॥ ।
शिरोमणिकृताख्यातार्थविवेचनमिदं तु सो॥ व्याख्यातुरूपसंख्यानेन मयाख्यानाय कल्पताम्॥ ॥

राम:
॥४॥